दिनाङ्क :- 13.11.2025

प्रात: - 06:55

मन्त्रिमण्डल- संकल्प:

केन्द्रीयमन्त्रिमण्डलेन एकस्मिन् प्रस्तावे दिल्लीनगरस्य लालकिला इति रक्तदुर्गस्य समीपे आतङ्कवादी-कारविस्फोट-घटनायां नागरिकाणां प्राणहानिविषये गहनः शोकः प्रकाशितः। नष्टानां निर्दोषाणां प्राणानां सम्मानार्थं मन्त्रिमण्डलेन निमेषद्वयं मौनम् आचरितम् । मन्त्रिमण्डलेन राष्ट्रियसुरक्षायाः, प्रत्येकस्य नागरिकस्य सुरक्षायाः च स्थायिप्रतिबद्धतायाः अनुरूपं सर्वेषां भारतीयानां जीवनस्य कल्याणस्य च रक्षणार्थं सर्वकारस्य दृढसंकल्पस्य पुनः पुष्टिः कृता । ह्यः मन्त्रिमण्डलस्य संगोष्ठ्याः अनन्तरं नवदिल्लीनगरे सञ्चारमाध्यमान् वार्ताहरान् च सूचयन् केन्द्रीयमन्त्री अश्विनीवैष्णवः अवदत् यत्, मन्त्रिमण्डलम् अस्याम् निरर्थकहिंसायाम् पीडितानां कृते श्रद्धांजलिः प्रकाशयति, शोकग्रस्तपरिवारेभ्यः च हृदयेन शोकसंवेदनां प्रकटयति ।

राष्ट्रपति

बोत्स्वाना अद्य चीता परियोजना इत्यस्य अन्तर्गतं भारतं प्रति स्थानान्तरणार्थम् चित्रकाणां हस्तान्तरणं करिष्यति । राष्ट्रपतिः द्रौपदी मुर्मू अथ बोत्स्वाना-देशस्य समकक्षस्य ड्यूमा बोको-इत्यस्य च द्विपक्षीयवार्तायाः अन्ते ह्यः संयुक्त-पत्रकार-समारोहस्य समये एतत् घोषितम्। इत: पूर्वं, राष्ट्रपतिः द्रौपदी मुर्मुः गैबोरोन-नगरे बोत्सवाना-देशस्य राष्ट्रपतिना डुमा-बोको-इत्यनेन सह द्वैपाक्षिकं वार्तालापं कृत्वा परस्पर-हितस्य विस्तृतविषयेषु चर्चा कृतवती। व्यापार-निवेशे, कृषौ, पुनर्नवीकरणीय ऊर्जायाम्, स्वास्थ्ये, शिक्षायाम्, कौशल-विकासे, रक्षणे, डिजिटल प्रौद्योगिक्यां एतादृशेषु प्रमुखेषु क्षेत्रेषु सहयोगं वर्धयितुं विस्तृत चर्चासु उभयनेतृभ्यां सहमतिः प्रकटिता । आकाशवाण्याः संवाददात्रा उक्तं यत् - "भारतस्य बोत्स्वाना-देशस्य च राष्ट्रपतिः गृहीतानाम् चीतानां गबोरोन्-नगरस्य समीपे स्थिते एकान्तिकस्थानात् मुक्तेः साक्षिणौ भवतः । एतत् आयोजनं बोत्स्वाना-देशेन भारताय चीता-दानस्य प्रतीकात्मकं भविष्यति । एतत् हस्तान्तरणं द्वयोः देशयोः वन्यजीव-संरक्षणस्य द्विपक्षीय-सहकार्यस्य नूतन-अध्यायस्य आरम्भम् सूचयति ।

भारते चित्रक-संख्यायाः पुनरुत्थाने सहायतार्थं बोत्स्वाना भारताय अष्टौ (८) चित्रकाणां दानं करिष्यति।

एस. जयशङ्करः

विदेशमन्त्री डॉ. एस.जयशङ्करः ह्यः कनाडादेशस्य जी-सप्त देशानाम् विदेशमन्त्रिणां उपवेशनमतिरिच्य कनाडादेशस्य विदेशमन्त्रिणा अनीता आनन्देन सह मिलितवान्। एकस्मिन् अन्तर्जालीय संदेशे डॉ. जयशङ्करः अस्य आयोजनस्य कृते अनीता आनन्दं प्रशंसितवान्। सममेव तेन उभयोः देशयोः मध्ये पारस्परिक संबंधाः सुदृढाः भवेयुः इति आशा प्रकटिता। डॉ. जयशङ्करः मेक्सिकोदेशस्य विदेशमन्त्रिणा डॉ. जुआन रामोन डे ला वर्येण सह अपि मेलनं विहितवान्। सहैव उभयोः देशयोः मध्ये व्यापार, वाणिज्य, स्वास्थ्य, विज्ञान, प्रौद्योगिकी चेत्यादिषु क्षेत्रेषु सहयोग-संवर्धनाय परिचर्चा विहिता।

ब्रिटेन देशस्य विदेशसचिवेन यवेट कूपरवर्यया सह संभाषयन् डॉ. जयशङ्करः द्विपक्षीयसम्बन्धेषु सकारात्मक प्रगतेः पुनः पुष्टिः कृता। कार्यक्रमावधौ सः ब्राजीलदेशस्य विदेशमन्त्रिणा मौरो वियरा, जर्मनदेशस्य विदेशमन्त्रिणा जोहान वेडफुल्, दक्षिण अफ्रीकादेशस्य विदेशमन्त्रिणा रोनाल्ड् लामोला इत्येतैः च सह मेलनं विहितवान्।

बिहार- मतगणना ::

बिहार विधानसभा निर्वाचनस्य मतगणना श्वः भविष्यति। बिहारस्य अष्टत्रिंशत् मण्डलेषु षड्चत्वारिंशत् मतगणनाकेन्द्रेषु मतगणना भविष्यति। विद्युदीय-मतदानयन्त्राणि (ईवीएम) येषु सर्वेषां अभ्यर्थीनां निर्वाचनभाग्यं मुद्रितम् अस्ति, तानि सुभद्र-कक्षेषु कठिनसुरक्षायां स्थापितानि सन्ति।

क्रिकेट टेस्ट ::

पुरुषक्रिकेट्-क्रीडायां, द्वन्द्व-द्वयात्मक-क्रिकेट् टेस्ट्-क्रीडायां भारतं दक्षिण-आफ्रिका देशस्य आतिथ्यं करोति। उद्घाटनक्रीडा श्वः कोलकातानगरस्य ईडेन् गार्डन्स् इत्यत्र भविष्यति। अस्याम् क्रीडायाम्, शुबमन गिल् नायकरूपेण दलस्य नेतृत्वं करिष्यति ।